# मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

Rashtriya Sanskrit Sansthan

(Deemed University)

नवदेहली

फलितज्यौतिषाचार्यप्रवेशपरीक्षा

# आदर्शप्रश्नपत्रम्

# (Model Paper)

समयः – होरात्रयम् पूर्णाङ्काः – 100+100

परीक्षार्थिनाम ..........................................................................

अनुक्रमाङ्कः ..........................................................................

परीक्षाकेन्द्रनाम ..........................................................................

परीक्षार्थिनः हस्ताक्षरम् ..........................................................................

स्वाध्यायकेन्द्रसमन्वयकस्य हस्ताक्षरम् ..........................................................................

निर्देशाः

- प्रवेशपरीक्षाप्रश्नपत्रे द्वौ भागौ भवतः । उभावपि भागौ तिसृषु घण्टासु समाधेयौ । परीक्षा पूर्वाह्ने एकादशवादनतः अपराह्ने द्विवादनं यावद् भवति ।
- **प्रथमभागे लघूत्तरीयप्रश्नाः भवन्ति ।**
- सर्वान् प्रश्नान् समाधत्त ।
- **द्वितीयभागे विवरणात्मकप्रश्नाः भवन्ति ।**
- **द्वयोरपि भागयोः प्रत्येकं ४० अङ्काः परीक्षोत्तीर्णतायै भवद्भिः प्राप्तव्याः ।**

## फलितज्यौतिषम्

### प्रथमो भागः

**निर्देशः – अधोलिखितानां प्रश्नानामुत्तरं यथास्थानं लिखत । समीचीनस्य उत्तरस्य कृते एकैकः अङ्कः प्रदास्यते ।** 01 x 100 = 100

1. बृहज्जातकस्य कर्ता कः ?
2. तनुभावो नाम कः ?
3. मेषराशेः अधिपः कः ?
4. रवेः उच्चराशिः कः ?
5. एकस्मिन् राशौ कति नक्षत्रचरणाः भवन्ति ?
6. एक राशिर्नाम कति अंशात्मकः ?
7. मिथुनराशेः वर्णः कः ?
8. वेदपुरुषस्य कस्मिन्नङ्गे ज्यौतिषशास्त्रं स्थितम् ?
9. वेदाङ्गानि कति ?
10. बृहज्जातकस्य मङ्गलाचरणे स्तुतः देवः कः ?
11. प्रथमभावस्य कारकः ग्रहः कः ?
12. पञ्चमभवनात् के विचाराः चिन्त्याः ?
13. कर्कराशिः कस्य ग्रहस्य उच्चस्थानम् ?
14. रवेः नीचस्थानं कुत्र ?
15. चन्द्रस्य मूलत्रिकोणराशिः कः ?
16. कालपुरुषस्य किमङ्गं सिंहराशौ चिन्तयेत् ?
17. मीनराशेः स्वरूपं किम् ?
18. एकस्य नवांशस्य मानं किम् ?
19. रवेः मित्रग्रहाः के ?

20. कस्य ग्रहस्य शत्रवः एव न सन्ति ?

21. नपुंसकौ ग्रहौ कौ ?

22. आत्मकारकः ग्रहः कः ?

23. मनः कारकः ग्रहः कः ?

24. कुमारः ग्रहः कः ?

25. सप्तधातुषु शुक्लकारकः ग्रहः कः ?

26. केन्द्रसंज्ञकभावाः के ?

27. त्रिकोणसंज्ञकाः भावाः के ?

28. राशेरर्धं किम् ?

29. द्रेष्काणो नाम राशेः कति भागः ?

30. चरराशयः के ?

31. उद्योगस्य चिन्तनं कस्मात् भावात् कर्तव्यम् ?

32. कुजः कस्मिन् राशौ कतमे अंशे उच्चः भवति ?

33. केशवीयजातकपद्धतिः केन रचितम् ?

34. कुजस्य मित्रग्रहाः के ?

35. त्रिकसंज्ञया अभिधीयमानाः भावाः के ?

36. पणफरसंज्ञकाः भावाः के ?

37. पुत्रकारकः ग्रहः कः ?

38. विंशोत्तरीदशायां रवेः दशावर्षाणि कति ?

39. मघानक्षत्रे जातः विंशोत्तरीदशायां कस्य ग्रहस्य दशाम् आदौ अनुभवति ?

40. स्त्रीग्रहौ कौ ?

41. चन्द्रात् द्वितीये द्वादशे च ग्रहाणामभावे कः योगः ?

42. एकस्य द्वादशांशस्य मानं लेख्यम् ।

43. उच्चस्थानात् सप्तमं स्थानं किं भवति ?

44. ताजिकशास्त्रानुसारेण षोडशयोगेषु प्रथमः योगः कः ?

45. ताजिकनीलकण्ठ्याः लेखकः कः ?

46. विंशोत्तरीदशायां कुजदशायाः अनन्तरं कस्य ग्रहस्य दशा ?

47. मुथहा प्रतिवर्षं कति राशिमतीत्य गच्छति ?

48. शनिः एकं राशिम् अतिक्रान्तुं कति वर्षाणि स्वीकरोति ?

49. स्त्रीजातके सप्तमस्थानात् किं चिन्त्यम् ?

50. भावप्रकाशस्य प्रणेता कः ?

51. एकस्मिन् राशिचक्रे कति नक्षत्राणि उक्तानि ?

52. सार्पनक्षत्रं नाम किं नक्षत्रम् ?

53. कस्य ग्रहस्य दोषनिवृत्त्यर्थं मौक्तिकं धार्यते ?

54. लग्ने षड्राशीणां योजनेन कः भावः लभ्यते ?

55. गोलपरिभाषानुसारेण शनेः कक्षायाः अधः कस्य ग्रहस्य कक्षास्ति ?

56. सूर्यभ्रमणवृत्तस्य किं नामधेयम् ?

57. भूगोलः कपित्थफलवद् अस्ति अथवा आम्रफलवत् ?

58. दिङ्निर्णयाय कति अङ्गुलात्मकः शङ्कुः अपेक्षितः ?

59. सूर्यग्रहणे छादकः कः ?

60. चन्द्रग्रहणे ग्राह्यं किम् ?

61. दक्षिणायनकालस्य गणना कथम् ?

62. स्थिरकरणनि कति ?

63. सुमेरुः कस्मिन् ध्रुवस्थाने अस्ति ?

64. पूर्वस्वस्तिकपश्चिमस्वस्तिकयोः कति राश्यात्मकम् अन्तरमस्ति ?

65. ध्रुवस्थानात् नवत्यंशैः किं वृत्तमस्ति ?

66. ध्रुवस्थानात् कतमे अंशे कदम्बवृत्तमस्ति ?

67. सर्वे ग्रहाः स्वस्थानात् कतमं स्थानं पूर्णदृष्ट्या पश्यन्ति ?

68. तिर्य्यर्धं किं स्यात् ?

69. प्रभवादि संवत्सराः कति ?

70. वृषभस्थे रवौ कः ऋतुः ?

71. नरराशयः के ?

72. रविः कं वर्णं सूचयति ?

73. हास्यरुचिसूचकः ग्रहः कः ?

74. एकस्मिन् नक्षत्रे कति चरणाः भवन्ति ?

75. आयुषः स्थानं किम् ?

76. चित्रानक्षत्रस्य द्वितीयचरणे उत्पन्नस्य जन्मराशिः कः ?

77. सर्वे ग्रहाः चतुर्षु राशिषु स्थिताश्चेत् सङ्ख्यायोगेषु कः योगः भवति ?

78. सूर्यात् द्वितीयस्थानस्य का संज्ञा ?

79. एकस्मिन् राशौ चतुर्णां ग्रहाणां स्थितौ कः योगः ?

80. दुश्चिक्यमिति कस्य भावस्य संज्ञा ?

81. मेषराशेः तृतीयनवांशस्याधिपः कः ?

82. जैमिनिसूत्रस्य कर्ता कः ?

83. त्रिदशस्थानयोः कस्य ग्रहस्य पूर्णा दृष्टिर्भवति ?

84. लवणरसकारकः ग्रहः कः ?

85. मेषराशेः लङ्कोदयमानं कति ?

86. जैमिनिसूत्रमतानुसारेण सर्वाधिकांशकयुतः ग्रहः कस्य कारकः ?

87. कुटुम्बभावः कः ?

88. वित्तेशः नाम कस्य भावस्य अधिपः ?

89. सिंहराशेः तृतीयद्रेष्काणस्याधिपः कः ?

90. द्विस्वभावराशयः के ?

91. यामित्रमिति कस्य भावस्य संज्ञा ?

92. भावाः कति ?

93. षड्वर्गाः के ?

94. नीलमणिः, तिलमित्यादिवस्तूनि कस्य ग्रहस्य कारकत्वेन निर्दिष्टम् ?

95. विंशोत्तरीदशाक्रमेण राहोः दशावर्षाणि कति ?

96. पापसन्दृष्टः चन्द्रः षष्ठे अष्टमे वा स्थिते कं योगं जनयति ?

97. स्त्रीजातके लग्नात्सप्तमे भौमे सति किं फलम् ?

98. ग्रहाः अस्तङ्गताः कदा जायन्ते ?

99. सर्वे शुभग्रहाः चन्द्रात् षष्ठसप्तमाष्टमस्थानेषु स्थिताश्चेत् कः योगः ?

100. "झषः" इति पदेन कः राशिः ग्राह्यः ?

## द्वितीयो भागः

**I अधोलिखितेषु केचन षट् प्रश्नाः समाधेयाः** 06 x 05 = 30

1. लघुजातकस्य मङ्गलाचरणस्याशयं विशदीकुरुत ।
2. रव्यादिग्रहाणाम् उच्चनीचस्थानानि निरूपयत ।
3. अरिष्टयोगद्वयं लिखत ।
4. भावप्रकाशमनुसृत्य पञ्चमभावफलं स्पष्टयत ।
5. ताजिकनीलकण्ठीमाधृत्य मेषवृषभराश्योः स्वरूपं विवेचयत ।
6. जैमिनिमुनेः मतानुसारेण ग्रहाणां दृष्टिविचारः प्रस्तोतव्यः ।
7. अधियोगः तत्फलञ्च निरूपणीयम् ।
8. ग्रहाणां कक्षाक्रमं विवृणुत ।
9. नवांशो नाम कः ? सोदाहरणं निरूपयत ।

**II अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः ।** 05 x 08 = 40

1. लग्नादिभावानां विविधाः संज्ञाः सङ्गृह्य लिखत ।
2. सोदाहरणं वर्षप्रवेशकालिकं तिथिसाधनं स्पष्टीकुरुत ।
3. अरिष्टभङ्गयोगचतुष्टयं व्याख्यात ।
4. केशवीयजातकोक्तं दृष्टिसाधनक्रमं विशदीकुरुत ।
5. आश्रययोगान् निरूपयत ।

6. जैमिनिसूत्राधारेण सोदाहरणं चरकारकविचारः निरूपणीयः ।

7. गोलपरिभाषायां महद्वृत्तलघुवृत्तयोः परिभाषा कथं निरूपितम् ? सचित्रं विवृणुत ।

8. भावप्रकाशोक्तप्रकारेण मेषवृषभमिथुनलग्नजातानां स्त्रीणां फलानि वर्णयत ।

**III अधोलिखितेषु त्रयः प्रश्नाः समाधेयाः** 03 x 10 = 30

1. लघुजातके ग्रहमैत्रीविवेकाध्याये निरूपितान् नैसर्गिकतात्कालिकमैत्रीविचारान् सङ्गृहीत ।

2. विंशोत्तरीदशानयनक्रमः प्रस्तोतव्यः ।

3. सुनफा-अनफा- दुरुधुरा-केमद्रुमयोगाः सफलं निरूपणीयम् ।

4. नाभसयोगाध्यायोक्तान् सङ्ख्यायोगान् निरूपयत ।

5. भावप्रकाशमनुसृत्य स्त्रीजातकविचारं कुरुत ।

6. सोदाहरणं मुथहालग्नसाधनं प्रदर्शयत ।